# sItAShTottarashatanAma stotraM

# સીતાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : siitaaShTottarashatanaama stotraM 1

File name : siitaa108stAnanda.itx

Category : aShTottarashatanAma, raama, stotra, vAlmIki

Location : doc_raama

Author : Valmiki

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma antaratma at Safe-mail.net

Description-comments : from Anandaramayana

Latest update : July 4, 2006

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 27, 2019

*sanskritdocuments.org*

# સીતાષ્ટોત્તરશતનામસ્તોત્રમ્

અથ શ્રીમદાનન્દરામાયણાન્તર્ગત શ્રી
સીતાષ્ટોત્તરશતનામ સ્તોત્રમ્ ॥

અગસ્તિરુવાચ-
એવં સુતીષ્ણ સીતાયાઃ કવચં તે મયેરિતં ।
અતઃ પરં શ્રુણુષ્વાન્યત્ સીતાયાઃ સ્તોત્ર મુત્તમં ॥ ૧
યસ્મિનષ્ટોત્તરશતં સીતાનામાનિ સન્તિ હિ ।
અષ્ટોત્તરશતં સીતા નામ્નાં સ્તોત્ર મનુત્તમમ્ ॥ ૨
યે પઠન્તિ નરાસ્ત્વત્ર તેષાં ચ સફલો ભવઃ ।
તે ધન્યા માનવા લોકે તે વૈકુણ્ઠં વ્રજન્તિ હિ ॥ ૩

ન્યાસઃ।
અસ્ય શ્રી સીતાનામાષ્ટોત્તરશતમન્ત્રસ્ય-
અગસ્ત્ય ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ ।
રમેતિ બીજં ।
માતુલિઙ્ગીતિ શક્તિઃ ।
પદ્માક્ષજેતિ કીલકં ।
અવનિજેત્યસ્ત્રં ।
જનકજેતિ કવચં ।
મૂલકાસુર મર્દિનીતિ પરમો મન્ત્રઃ ।
શ્રી સીતારામચન્દ્ર પ્રીત્યર્થં સકલ કામના સિદ્ધ્યર્થં
જપે વિનિયોગઃ ॥

કરન્યાસઃ ॥

ૐ સીતાયૈ અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ રમાયૈ તર્જનીભ્યાં નમઃ ।

ૐ માતુલિઙ્ગ્યૈ મધ્યમાભ્યાં નમઃ ।
ૐ પદ્માક્ષજાયૈ અનામિકાભ્યાં નમઃ ।
ૐ અવનિજાયૈ કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ જનકજાયૈ કરતલ કરપૃષ્ઠાભ્યાં નમઃ ॥

અઙ્ગન્યાસઃ ॥

ૐ સીતાયૈ હૃદયાય નમઃ ।
ૐ રમાયૈ શિરસે સ્વાહા ।
ૐ માતુલિઙ્ગ્યૈ શિખાયૈ વષટ્ ।
ૐ પદ્માક્ષજાયૈ નેત્રત્રયાય વૌષટ્ ।
ૐ જનકાત્મજાયૈ અસ્ત્રાય ફટ્ ।
ૐ મૂલકાસુરમર્દિન્યૈ ઇતિ દિગ્બન્ધઃ ॥

અથ ધ્યાનમ્ ॥

વામાઙ્ગે રઘુનાયકસ્ય રુચિરે યા સંસ્થિતા શોભના
યા વિપ્રાધિપ યાન રમ્ય નયના યા વિપ્રપાલાનના ।
વિદ્યુત્પુઞ્જ વિરાજમાન વસના ભક્તાર્તિ સઙ્ખણ્ડના
શ્રીમદ્ રાઘવ પાદપદ્મયુગળ ન્યસ્તેક્ષણા સાવતુ ॥

શ્રી સીતા જાનકી દેવી વૈદેહી રાઘવપ્રિયા ।
રમાવનિસુતા રામા રાક્ષસાન્ત પ્રકારિણી ॥ ૧
રત્નગુપ્તા માતુલિઙ્ગી મૈથિલી ભક્તતોષદા ।
પદ્માક્ષજા કઞ્જનેત્રા સ્મિતાસ્યા નૂપુરસ્વના ॥ ૨
વૈકુણ્ઠનિલયા મા શ્રીઃ મુક્તિદા કામપૂરણી ।
નૃપાત્મજા હેમવર્ણા મૃદુલાઙ્ગી સુભાષિણી ॥ ૩
કુશામ્બિકા દિવ્યદાચ લવમાતા મનોહરા ।
હનૂમદ્ વન્દિતપદા મુગ્ધા કેયૂર ધારિણી ॥ ૪
અશોકવન મધ્યસ્થા રાવણાદિગ મોહિની ।
વિમાનસંસ્થિતા સુભ્રૂ સુકેશી રશનાન્વિતા ॥ ૫
રજોરૂપા સત્વરૂપા તામસી વહ્નિવસિની ।
હેમમૃગાસક્ત ચિત્તા વાલ્મીકાશ્રમ વાસિની ॥ ૬
પતિવ્રતા મહામાયા પીતકૌશેય વાસિની ।
મૃગનેત્રા ચ બિમ્બોષ્ઠી ધનુર્વિદ્યા વિશારદા ॥ ૭

સૌમ્યરૂપા દશરથસ્નુષા ચામર વીજિતા ।
સુમેધા દુહિતા દિવ્યરૂપા ત્રૈલોક્યપાલિનિ ॥ ૮
અન્નપૂર્ણા મહાલક્ષ્મીઃ ધીર્લજ્જા ચ સરસ્વતી ।
શાન્તિઃ પુષ્ટિઃ શમા ગૌરી પ્રભાયોધ્યા નિવાસિની ॥ ૯
વસન્તશીલતા ગૌરી સ્નાન સન્તુષ્ટ માનસા ।
રમાનામ ભદ્રસંસ્થા હેમકુમ્ભ પયોધરા ॥ ૧૦
સુરાર્ચિતા ધૃતિઃ કાન્તિઃ સ્મૃતિર્મેધા વિભાવરી ।
લઘૂદરા વરારોહા હેમકઙ્કણ મણ્ડિતા ॥ ૧૧
દ્વિજ પત્ન્યર્પિત નિજભૂષા રાઘવ તોષિણી ।
શ્રીરામ સેવન રતા રત્ન તાટઙ્ક ધારિણી ॥ ૧૨
રામાવામાઙ્ગ સંસ્થા ચ રામચન્દ્રૈક રઞ્જિની ।
સરયૂજલ સઙ્ક્રીડા કારિણી રામમોહિની ॥ ૧૩
સુવર્ણ તુલિતા પુણ્યા પુણ્યકીર્તિઃ કલાવતી ।
કલકણ્ઠા કમ્બુકણ્ઠા રમ્ભોરૂર્ગજગામિની ॥ ૧૪
રામાર્પિતમના રામવન્દિતા રામવલ્લભા ।
શ્રીરામપદ ચિહ્નાઙ્ગા રામ રામેતિ ભાષિણી ॥ ૧૫
રામપર્યઙ્ક શયના રામાઙ્ઘ્રિ ક્ષાલિણી વરા ।
કામધેન્વન્ન સન્તુષ્ટા માતુલિઙ્ગ કરાધૃતા ॥ ૧૬
દિવ્યચન્દન સંસ્થા શ્રી મૂલકાસુર મર્દિની ।
એવં અષ્ટોત્તરશતં સીતાનામ્નાં સુપુણ્યદમ્ ॥ ૧૭
યે પઠન્તિ નરા ભૂમ્યાં તે ધન્યાઃ સ્વર્ગગામિનઃ ।
અષ્ટોત્તરશતં નામ્નાં સીતાયાઃ સ્તોત્રમુત્તમમ્ ॥ ૧૮
જપનીયં પ્રયત્નેન સર્વદા ભક્તિ પૂર્વકં ।
સન્તિ સ્તોત્રાણ્યનેકા નિ પુણ્યદાનિ મહાન્તિ ચ ॥ ૧૯
નાનેન સદૃશાનીહ તાનિ સર્વાણિ ભૂસુર ।
સ્તોત્રાણામુત્તમં ચેદં ભુક્તિ મુક્તિ પ્રદં નૃણામ્ ॥ ૨૦
એવં સુતીષ્ણ તે પ્રોક્તં અષ્ટોત્તરશતં શુભં ।
સીતાનામ્નાં પુણ્યદઞ્ચ શ્રવણાન્ મઙ્ગળ પ્રદમ્ ॥ ૨૧
નરૈઃ પ્રાતઃ સમુત્થાય પઠિતવ્યં પ્રયત્નતઃ ।
સીતા પૂજન કાલેપિ સર્વ વાઞ્છિતદાયકમ્ ॥ ૨૨

ઇતિ શ્રીશતકોટિ રામચરિતાન્તર્ગત

શ્રીમદાનન્દરામાયણે વાલ્મિકીયે મનોહરકાણ્ડે
સીતાષ્ટોત્તરશતનામ સ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Antaratma antaratma at Safe-mail.net

*sItAShTottarashatanAma stotraM*
pdf was typeset on December 27, 2019

Please send corrections to *sanskrit@cheerful.com*